## ।। अथ अष्टषष्ठितमोऽध्यायः ।। chapter-68

वसिष्ठ उवाच :- श्रृणु राजन् प्रवक्ष्यामि कथामेकां मनोहराम् ।।
श्रीमाले च श्रियाः क्षेत्रे वसति च घनोत्कटः ।। १

लक्ष्मीदासश्च तन्नाम श्रिया भक्तौ हि तत्परः ।।
तस्यपत्नी विशालाक्षी रम्भा नाम्नेति विश्रुता ।। २

पतिव्रता च सा रंभा भर्तारमनुगच्छति ।।
न गर्भो जायते तस्या वयसा जरितः पतिः[१ए] ।। ३

दुःखार्ता पुत्रशोकेन सुखं न विन्दते क्वचित् ।।
प्रमीभूता च सा नारी मनसा चिन्तयन्तीत्यहि।। ४

किं करोमि क्व गच्छामि कस्य वा कथयाम्यहम् ।।
भर्ता वृद्धत्वमाप्तो हि पुत्रहीना वयं तथा ।। ५

कः श्रृणोति च मे वाक्यं दुःखीभूता भ्रमाम्यहम् ।।
किं कृतं दुष्कृतं पूर्वं मया पुत्रो न लभ्यते ।। ६

पुत्रं विना गतिर्नास्ति स्वर्गे नैव च नैव च ।।
पुत्रस्योत्पादनं कार्यमन्यथा दुर्गतिर्भवेत् ।। ७

-o-

१ ए वयेन जरितो पतिः

पृच्छाम श्चत्त्वयं त्वय काश्यपेंयगुरो:पुरा ।।
इती चिन्तयन्ती सा तु गच्छति कश्यपाश्रमम् ।। ८

नमस्कृत्वा कश्यपाय तदारम्भावदन् निजम् ।। ९

रम्भोवाच :- लोके गुरो कृपालुस्त्वं शास्त्रवेदा वदन्ति हि ।।
पतिर्मे जरया वृद्धो मयि पुत्र: कथं भवेत् ।। १०

किं करोमि च हे ब्रह्मन्पुत्रसन्तानहेतवे ।।

काश्यपउवाच :- मा शोकं कुरु रम्भे त्वं त्वयि पुत्रो भविष्यति ।।
योगेश्वरी कुले देवी कश्यपे पुत्रदायिनी ।। ११

राधनं कुरु कल्याणि तव गोत्रंच कश्यपम् ।।
तस्मात्तुभ्यं कुलदेवी पुत्रदात्री[१ए] भविष्यति ।। १२

वशिष्ठ उवाच:- तच्छ्रुत्वा वचनं रंभा कृत्वा कार्यं निरंतरम् ।।
देवीमाराधयामास गन्धपुष्पैश्च संयुता ।। १३

धूपैर्दीपैश्च नैवेद्यैर्बलिदानेन संयुतै: ।।
देवीपूजां चकाराशु पुत्रसन्तानहेतवे ।। १४

१ ए पुत्रदाता

एवं प्रयतमानाया वत्सरत्रितयं गतम् ॥
ततो देवी प्रसन्नाऽभूत् प्रत्यक्षा परमेश्वरी ॥ १५

देव्युवाच :- भविष्यतितवसुतो[१ए] बुद्धिमान् सुविचक्षण: ॥ १६

वसिष्ठ उवाच :- तस्या देव्या: प्रसादेन रम्भा संतुष्टिमाप्नुयात् ॥
तस्या: कुले कुलदेवी योगेश्वरी ततोऽभवत् ॥ १६
वणिक्सुवर्णकाराणामन्येषां कुलदेवी तु ॥
गुरोगोत्रे च या देवी यजमानेऽपि सा भवेत् ॥ १७
[२ए]यत्कार्येण संतुष्टा कार्यं कृत्वा प्रसिद्धिता ॥
एवं हि गोत्रजा देवी कथिता च मयानघे ॥ १८

यां श्रुत्वा मानवो भक्त्या सर्वपापै: प्रमुच्यते ॥

-0-

इति श्री स्कंद पुराणे एकाशीति साहस्त्र्यां संहितायां
तृतीय परिच्छेदे ब्राह्मविभागे श्रीमाल माहात्म्ये कुलदेवी कथनंनाम
अष्टषष्ठितमोऽध्याय: ॥६८॥

१ ए भविष्याभितव
२ ए मायाकार्येण